२असुरभेदे पु० सच वृत्रासुरस्यावरजः। "क्रोधहन्तेति यस्तस्य (वृत्रस्य) बभूवावरजोऽसुरः। दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ" भा० आ० ६७०।

३असुरभेदे पु० क्रोधवर्द्धनशब्दे दृश्यम्

**क्रोधसम्भव** त्रि० सम्भवत्यस्मात् सम्+भू—अपादाने अप् क्रोधः सम्भवोऽस्य। कोपजाते "क्रोधात् भवति संमोहः" गीता०भावे अप् ६त०। २कोपोत्पत्तौ "मार्ज्जारमूषिकास्पर्शे आक्रुष्टे क्रोधसम्भवे" क्रोधसम्भवे कोपोत्पत्तौ" श्रा० त० रघुनन्दनः। [ बलो निशाविहारी" सुश्रुतः

**क्रोधालु** त्रि० क्रुध—बा० आलुच्। कोपशीले "क्रोधालुर्विपुल-

**क्रोधिन्** त्रि० क्रुध—णिनि। कोपयुक्ते मारुतप्रकृतेरेव तथात्वं भवति यथाह सुश्रुतः

"सप्त प्रकृतयो भवन्ति। दोषैः पृथक्१द्विशः२समस्तैश्च३। शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः। प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु। तत्र जागरूकः शीतद्वेषी दुर्भगः स्तेनो मात्सर्य्यनार्य्यो गान्धर्व्वचित्तः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च भवति। अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी। द्रुतगतिरटनोऽनवस्थितात्मा वियदपि गच्छति सम्भ्रमेण सुप्तः। अव्यवस्थितमतिश्चलदृष्टिर्मन्दरत्नधनसञ्चयमित्रः। किञ्चिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेष मनुष्यः"।

**क्रोश** पु० क्रुश—भावे घञ्। १रोदने २आह्वाने च। क्रोशति यतः अपादाने घञ्। "हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितीयेन तेषाम्" लीला०व०उक्ते८०००सहस्रकरमिते अध्वपरिमाणे "चतुर्हस्तोधनुर्दण्डो नालिका तद्युगेन च। क्रोशोधनुः सहस्रेण गव्यूतिश्च चतुर्गुणा" हेमा०दा०मार्क० पु० उक्तेः, "गव्यूतिः स्त्री क्रोशयुगम्" अमरोक्तेश्च तस्य गव्यूतेरर्द्धमानता प्रतीयते हेमाद्रि० दा० आदित्य पुराणे च "धनुःसहस्रे द्वे चापि गव्यूतिरुपदिश्यते" इत्युक्त्या तु गव्यूतेर्द्विसहस्रधनुर्मितत्वात् तदर्द्धत्वेन चतुःसहस्रहस्तमितत्वमपि क्रोशस्य कार्य्यविशेषे गृह्यते इति भेदः। २मुहूर्त्ते "दशदण्डे तु या पूजा तत्सर्व्वमक्षयं भवेत्। षष्ठे क्रोशे महेशानि! तत्सर्व्वमकृतोपमम्। सप्तमे क्रोशके देवि! द्रव्यतुल्यं न संशयः। अतःपरं महेशानि। विषतुल्यं न संशयः" इति शक्तिस० त० ६पटले। "क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा" रघुः

**क्रोशताल** पु०क्रोशं व्याप्य तालः शब्दोऽस्य। ढक्कायां हारा०

**क्रोशध्वनि** पु० क्रोशं व्याप्य ध्वनिरस्य। ढक्कायां हारा०

**क्रोशयुग** न० ६त०। क्रोशद्वयमिते गव्यूतौ अमरः

**क्रोशिन्** त्रि०क्रुश—णिनि। शब्दकारके उपमानपूर्व्वकतया समासे क्रोशिनि परे पूर्व्वपदस्याद्युदात्तता। उष्ट्रक्रोशी

**क्रोष्टु** पुंस्त्री क्रुश—तुन्। १शृगाले अमरः अस्य असंबुद्धौ सर्व्वनामस्थाने परे नित्यं तृतीयादावचि वा, स्त्रियां तु नित्यं तृज्वत्। क्रोष्टा क्रोष्टारौ हे क्रोष्टो!। क्रोष्टून्। क्रोष्ट्रा क्रोष्टुना क्रोष्टुभ्यामित्यादि स्त्रियां ङीप् क्रोष्ट्री। "क्रोष्टा मायोरिन्द्रस्य गौरमृगः" यजु०२४,३२ "शार्दूलस्य गुहां शून्यां नीचः क्रोष्टाऽभिमर्दति" भा०आ० २१३अ० २यदुवंश्ये नृपभेदे पु०। "क्रोष्टोस्तु शृणु राजेन्द्र! वंशमुत्तममव्ययम्। यदोर्वंशधरस्याथ यज्वनः पुण्यकर्म्मणः। क्रोष्टोर्वंशं हि श्रुत्वेमं सर्व्वपापैः प्रमुच्यते। यस्यान्ववायजो विष्णुर्हरिर्वृष्णिकुलोद्वहः" "गान्धारी चैव माद्री च क्रोष्टोर्भार्य्ये बभूवतुः" हरि०३५अ०स्वार्थे क। शृगाले "क्रोष्टुकद्यौपिवदनैर्कर्णभसुखैस्तथा" भा० आ०१४०अ०। क्रोष्टुकपुच्छिका। क्रोष्टुर्गोत्रापत्यम् कुञ्जा० च्फञ् क्रोष्टुः क्रोष्टुः। क्रौष्टायन ततः स्वार्थे अस्त्रियां ञ्यः। क्रौष्टायन्य तद्गोत्रापत्ये पुंसि स्त्रियान्तु न ञ्यः। जातित्वात् ङीष क्रौष्टायनी।

**क्रोष्टुकपुच्छिका** स्त्री क्रोष्टुकस्य शृगालस्य पुच्छमिव पुष्पमस्त्यस्य ठन्। १पृश्निपर्ण्याम् (चाकुलिया) (रामवासक्) इत्यमरटीकायां स्वामी २गोलोमिकायाम् राजनि०

**क्रोष्टकमेखला** स्त्री क्रोष्टुकस्य मेखलेवास्त्यस्याः अच्। पृश्निपर्ण्यां (चाकुलिया) रत्नमा०

**क्रोष्टकर्ण** पु०। ग्रामभेदे सोऽभिजनोऽस्य तक्षशिला० अञ्। क्रौष्टुकर्ण पित्रादिक्रमेण तद्ग्रामवासिनि स्त्रियां ङीप्

**क्रोष्टुकशिरस्** न० "वातशोणितजःशोफः जानुमध्ये महारुजः। शिरःक्रोष्टुकपूर्वन्तु स्थूलं क्रोष्टुकमूर्द्धवत्" सुश्रुतोक्ते वातजे रोगभेदे। क्रोष्टुकशिरःखञ्जपङ्गुलवातवेदनासु इत्यादि" "गृध्रसी विश्वाची क्रोष्टुकशिरःखञ्जेत्यादि सुश्रु०

**क्रोष्टुपाद** पु० ऋषिभेदे तस्य गोत्रापत्यम् इञ्। क्रौष्टुपादि तद्गोत्रापत्ये अस्त्रियां बहुत्वे यस्का०तस्य लुक्। क्रोष्टुपादाः स्त्रियान्तु क्रौष्टुपाद्यः। एवं क्रोष्टुमान, क्रोष्टुमायशब्दौ ऋषिभेदयोः तदपत्ये इञ् बहुषु अस्त्रियाम् यस्कादि० तस्य लुक्।

**क्रोष्टुपुच्छिका** स्त्री क्रोष्टुःपुच्छमिवास्त्यस्याः ठन्। पृश्निपर्ण्याम् (चाकुलिया) रत्नमा०